श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ शृङ्गारस्तबकः ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ शृङ्गारस्तबकः ॥

दुर्ज्ञेयमहिमा सा मां क्षीराब्धिदुहितावतात्।
शृङ्गाररससर्वस्वं शेषशैलेश्वरस्य या॥ १ ॥

विहितस्मरसौरभेण पद्मे विविधेनाम्ब विलासचेष्टितेन।
अतिविस्मयमादधाति शौरेरनुभूतापि चिरादपूर्ववत्त्वम्॥ २ ॥

कमले तव हन्त वीक्षितानां कुटिलिम्ना कवलीकृतं सदापि।
फणिशैलपतेर्न जातु चेतः प्रतिघोपज्ञमुपैति वक्रिमाणम्॥ ३ ॥

विषमायुधास्त्रसुषमावहैरहो तव लोकमातरवलोकविभ्रमैः।
भगवानहीन्द्रनगवास्युपाश्नुते तरसा मनोज्ञतरसात्त्विकश्रियम्॥ ४ ॥

कलशाब्धिपुत्रि बलशासनादिभिः निगमैर्नरैर्दिविगमैरपि स्तुतः।
छलहेतुकेषु कलहेषु केशवः स भिया तवैकमभियाचते वचः॥ ५ ॥

स्तम्भतः स्वयमवाप सम्भवं यः पुरा नरहरिर्हरिप्रिये।
शम्बराहितविलासडम्बरैः स्तम्भमम्ब जनयत्ययं त्वयि॥ ६ ॥

अहारि नेत्रं मम पश्यतोऽनया प्रसह्य चोरस्थलसक्तयेति किम्।
प्रतिक्रियायै हरते रतेषु ते हरिर्हठादम्बरमम्ब रंहसा॥ ७ ॥

अम्ब त्वमत्यन्तमुदारतोरुचमत्कृतिं दर्शयितुं प्रियाय।
अभ्यर्थयित्रे भृशमात्मनोऽपि कुचेलमित्राय ददासि चेलम्॥ ८ ॥

बहिस्त्वालीवर्गस्तव नवरतौ देवि हरिणा
करग्राहोन्मीलद्वलयरवशुश्रूषुरुषितः।
प्रियस्पर्शानन्दोन्मिषित भवतीहासनिभृतैः
कलध्वानोपेतैः कनकवलयैर्वञ्चित इव॥ ९ ॥

हठात् क्रीडायुद्धे हरिसखि भवत्याः कचभरे
गृहीते कान्तेन ग्रहिलहृदयः काममदयः।
मनोजन्मा मर्माविधमथ गलत्पुष्पकपटात्
अवर्षद् बाणौघं प्रसभमुपरिष्टान्मधुरिपोः॥ १० ॥

आख्यया च महसा हरेः करस्पर्शनेन मृदितः पयोधरः।
देवि विक्षिपति ते स्रगुद्गलत्पुष्पमौक्तिकमयान् पयः कणान्॥ ११ ॥

सरभसपरिरिप्सासम्भ्रमोच्छूनपीनस्तनशिथिलितबन्धा मञ्जुला कञ्चुकी ते।
अतनुसमरकेलावप्रयत्नात्प्रियेण द्रुततरमपनीता दुग्धसिन्धोस्तनूजे॥ १२ ॥

हरति तदिदमुच्चैर्हन्त चक्रावलेपं दिशति जननि खेदं मध्यदेशस्य चेति।
मदनयुधि कराभ्यां मर्दितं युग्ममेतत् कुचधरणिभृतोस्ते कुप्यतेवाच्युतेन॥ १३ ॥

कठिननखमुखक्षतानि शौरेः करयुगनिर्दयमर्दनानि चास्य।
भगवति सहमानयोः प्रकामं तव कुचयोरुचितं क्षमाधरत्वम्॥ १४ ॥

भीतं शीतकराद्रथाङ्गमिथुनं नित्यानुषङ्गाशया
मातर्व्यातत तावकस्तनजनिं मानात् पुनश्चन्द्रमाः।
त्वत्प्राणेशनखात्मना कृतजनिस्तत्र प्रदत्ते क्षतं
वैरं हन्त विरोधिनोः किल मिथो जन्मान्तरेऽप्यक्षतम्॥ १५ ॥

सन्त्यज्य सुन्दरि सुदर्शनपाञ्चजन्यावेकेन कण्ठमितरेण करद्वयेन।
सङ्गृह्णतस्तव कुचौ च मदम्ब शौरेः नो शङ्खचक्रधरता विरता रतेऽपि॥ १६ ॥

भावत्कमाचरति देवि हरावपूर्वं पाणिग्रहं विजनकेलिगृहं प्रविश्य।
लाजायितं विमृदितस्तनलोलहार व्याकीर्णमौक्तिकचयैर्ज्वलति स्मराग्नौ॥ १७ ॥

पञ्चायुधान्यपि विहाय तवाङ्गकेषु सञ्चारयन् स चतुरश्चतुरः स्वहस्तान्।
कञ्जालये कथमहो मधुकैटभारिः पञ्चायुधाजिमपि हर्षभरादकार्षीत्॥ १८ ॥

क्रीडारणे तव कृतापजयः स्मरेण सन्त्याजितेष्वपि च शार्ङ्गमुखायुधेषु।
कल्याणि कंसदमनः कमले विचित्रं उत्तुङ्गचापलतया ननु योजितोऽभूत्॥ १९ ॥

उपमर्दितयोरुरोजयोस्ते दयिताश्लेषदशासु मौक्तिकानाम्।
नवचन्दनरेणुनिर्विशेषं परिणामं प्रतिपेदिरे परागाः॥ २० ॥

मायावादैस्तव तु वशिते देवि मध्वार्तिकारि-
ण्यङ्गाभ्यां वां विघटितमभूद् द्वैतमालिङ्गनेषु।
आभिर्मुक्तावलिभिरचिरादाश्रितं निर्गुणत्वं
व्यक्ता चान्तःकरणहरणात्तादृगानन्दपूर्तिः॥ २१ ॥

जलजायतने समस्तनागप्रवरप्रौढनिबन्धनश्रमेण।
प्रियपाणिनियन्त्रणोचितायास्तव कण्ठादुदितास्तदा सुशब्दाः॥ २२ ॥

योगे पयोधितनये युवयोस्तदानीं शम्पालताजलदयोरिव संप्रवृत्ते।
उज्जृम्भितातनुशुभाशुगवेगनीता युक्तं श्रमाम्बुकणिकामयवृष्टिरासीत्॥ २३ ॥

चलद्गुणेष्वत्र पयोधिजातेष्वत्रासमुक्तावलिषु प्रकम्पः।
रमे सदा राजकराप्तनानाहारेषु युक्तोऽतनुयुद्धकाले॥ २४ ॥

गाढं श्लिष्यति माधवे सकुतुकं क्रीडावनीं त्वां तदा
युक्तं चम्पकगर्भसौरभशुभैरस्पन्दि मन्दानिलैः।
राजीवोपरि पर्यपाति सहसा लोलैरलीनां कुलैः
आसीदम्ब कदम्बकोरकचयो यस्मादतो विस्मयः॥ २५ ॥

प्रसभमरुणबिम्बं ग्रस्तमासीदकस्मात् परिपतितमुडूनां पङ्क्तिभिर्मेरुशृङ्गात्।
अपि तिमिरवृताभूदिन्दिरे चन्द्ररेखा तव च मधुजितश्च द्वन्द्वयुद्धे प्रवृद्धे॥ २६ ॥

वपुषि मृदुतमे ते वेदना मा जनीति
प्रतिशमयिषतापि प्रेयसा माधवेन।
विपुलपुलकपाली विश्वमातः स्वकाङ्गे
तव दृढपरिरम्भात् स्वैरमुन्मेषिताहो॥ २७ ॥

मधुमथनमनःप्रहर्षहेतोः मनसिजयज्ञमनेकधा विधाय।
ध्रुवमवभृथमज्जनं भवत्या जननि कृतं शुचिभिः श्रमाम्बुपूरैः॥ २८ ॥

सायासायाः सुरतविरतौ कान्त बाहान्तराळे
    विन्यस्यास्यं तव भगवति स्वापसौख्यं भजन्त्याः।
फालोत्पन्नश्रमजलमिलच्चित्रकप्रस्रुतोऽस्मिन्
    श्रीवत्सोऽन्यः स भवतु रमे यस्तु कस्तूरिबिन्दुः॥ २९ ॥

सञ्जातं नयनयुगे निरञ्जनत्वं नीरागः स्फुरमभवत्तवाधरोऽपि।
सम्पन्ना जननि कचेऽपि बन्धमुक्तिः सानन्दं रहसि हरेरुपासनेन॥ ३० ॥

मलयमुकुटीवाटीपाटीरकोटरनाटिनः
    सरसिजमधुस्पन्दामन्दाघमर्षणहर्षिणः।
तव रतिभवं लुम्पन्त्यम्ब श्रमं शयनीभवत्
    फणिपतिभिया मन्दं मन्दं चरन्त इवानिलाः॥ ३१ ॥

वनजनिलये वारिक्रीडादशासु दशानन-
    द्विषि तव शनैरातन्वाने कुचे नखचेष्टितम्।
क्षुभितमनसा दत्ता नाथे त्वया शफरीभिया
    सरभसपरीरम्भारम्भा जयन्ति निरन्तराः॥ ३२ ॥

सरसिजवने संलीनायाः सकौतुकमिन्दिरे
    सलिलविहृतौ शौरेर्लेलिक्षणस्य मुखस्य ते।
अलिकवलितालोलश्यामालकस्य सरोरुहात्
    अळिकबलिताच्छैवालाढ्यादभून्न भिदाग्रहः॥ ३३ ॥

युगपदहिमही भृत्युन्मिषन्तं समन्ताद्
    ऋतुगणमपि कृत्स्नं निर्विशन्निर्विशङ्कः।
सह विहरति लीलालाभवत्या भवत्या
    मम जननि मुकुन्दो मञ्जुवल्लीगृहेषु॥ ३४ ॥

कुसुमशरधनुर्ज्यातुङ्गटङ्कारशङ्का
    करमधुकरसङ्घारब्धझङ्कारहृद्यान्।
फणिगिरिवनदेशान् पद्मनाभः स पद्मे
    सफलयति गभीरैस्त्वत्सहायो विहारैः॥ ३५ ॥

साकं लोकपतिस्त्वया विहरते काकोदराद्रौ रमे
    सूनेषोरवने वने नयनयोरानन्दने चान्दने।
शम्पाश्लिष्टनवाम्बुदभ्रमजुषामङ्के चिरं केकिनां
    नृत्ताडम्बरनुन्नपन्नगतया निर्दोषमन्दानिले॥ ३६ ॥

कान्तो रन्तुमनास्त्वया सह रमे कामेन मुह्यन् हरिः
    श्यामां केळिवनीममंस्त रजनीं दूरीकृतार्कद्युतिम्।
सन्ध्यारागमगेषु पल्लवगणन्तत्कोरकांस्तारका-
    ण्यन्तः सन्तमसं लसन्मधुकरश्रेणीं च नाणीयसीम्॥ ३७ ॥

त्वन्नाथाख्यावहनविशदीभूततद्दास्यदार्ढ्यं
    किञ्चित्कृत्वा कलयितुमिवाकाङ्क्षता माधवेन।
पत्या साकं प्रणयकलहं तावकं छेत्तुकामे
    कामे देवि स्वयमुपवने तन्यते बाणदानम्॥ ३८ ॥

सोऽयं गायन् स्मरमनुमलिः शश्वदव्यादभव्यात्
    सम्पश्यन्ती यमिह कबरीसौरभादापतन्तम्।
जातोद्वेगा जगदधिभुवे चित्रमप्रार्थितापि
    स्वैरं दत्से सरभसपरीरम्भमम्भोधिकन्ये॥ ३९ ॥

मन्दं मन्दं वृषगिरितटीं स्वैरमाटीकमानः
    खेलं खेलं विमलहरिणाङ्काननेकाननेषु।
ग्राहं ग्राहं मृदुसुमनसः कौतुकी कैटभारिः
    वारं वारं तव वितनुते देवि मूर्धाभिषेकम्॥ ४० ॥

रागेणोपर्यनिशमुषितं पुष्पवत्या लतायाः
    प्रीत्या गृह्णन् कमपि कुतुकी पल्लवं फुल्लवक्त्रः।
सान्द्रामोदं चिकुरसुमनः सन्निधानेन नीत्वा
    शार्ङ्गी हन्त श्रुतिशिरसि ते स्थापयत्यब्धिकन्ये॥ ४१ ॥

दत्ते मातस्तव किल मुखे पाणिना दुर्निवार
    स्वेदेनासौ कमपि तिलकं कौतुकी श्रीनिवासः।

त्वं तु स्वेदस्रुतिविघटितस्थानविन्यासमेनं
वीक्ष्यादर्शे हससि दयितं मोघयत्नं विदग्धा॥ ४२ ॥

शेषक्ष्माभृत्तटवनचरश्यामजीमूतसङ्के
संलीय त्वां भ्रमयितुमनाः कल्पिताभेदमोहः।
तस्मिन् विद्युत्पटलजटिले तं विचेतुं विशन्त्या
ज्यावृत्तिं ते विशदमविदन् स स्वयं वञ्चितोऽभूत्॥ ४३ ॥

बाले देहि पयोधरं करतले प्रावृट् त्वया याच्यताम्
आश्लेषाभिरुचिं विधेहि न शशी तस्यास्मि किन्तु स्वसा।
आस्तामुत्तरमेतदीदृगधरं याचामि वाचा स्वयं
नास्त्यर्थोऽधरयाञ्चयेति चटुभिः पद्मे धिनोषि प्रियम्॥ ४४ ॥

पश्चादुपेत्य परिहासकृते कराभ्यां
दृष्टी तवाम्ब विपुले स्थगयन् सशेषम्।
पाणिद्वयं मम न कृत्स्नपिधानकेलौ
पर्याप्तमित्यहिगिरेः पतिरेति लज्जाम्॥ ४५ ॥

तव लोकमातरवलोकवागुरा मृगजालदृष्टियुगजाड्यकृद्गुणा।
ननु भाति चित्रमनुभावमाश्रिता हरिणापि तत्र हरिणायितं ततः॥ ४६ ॥

स्मितचन्द्रिकया कयापि देवि स्मरसंवृद्धिपुषा सदोन्मिषन्त्या।
मधुसूदनमानसेन्दुकान्ते द्रवतां चन्द्रमसः स्वसस्तनोषि॥ ४७ ॥

तव स्तनं शैलघनं विनोदात् प्रसह्य गृह्णन् प्रभुरब्धिकन्ये।
पुरा मुरारिः स्वकरोद्धृतस्य गोवर्धनस्य स्मृतवान् महाद्रेः॥ ४८ ॥

वल्ली तमालमिव विद्युदिवाम्बुवाहं
माहेन्द्रनीलभवनं मणिदीपिकेव।
इन्दोः कलेव गगणाङ्गणमिन्दिरे त्वम्
आश्लिष्य शौरिमयसे महतीमभिख्याम्॥ ४९ ॥

मदनतरुपल्लवानां
मधुसूदनमानसालिकुसुमानाम्।

तत्कृततपः फलानां
　　तव ललिताना तु जननि कः स्तोता॥ ५० ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे शृङ्गारस्तबकः ॥